दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-222 | 1 | जून 10 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः ज्येष्ठशुक्लपूर्णिमा
ज्येष्ठ 27 प्रविष्ठांशः मङ्गलमयः भवेत्

2 HPCM- शोङ्गटोङ्ग-परियोजनायाः पूर्णतायै नवम्बर २०२६ तमस्य वर्षस्य लक्ष्यम्

3 संस्कृतभाषया राष्ट्रस्य समग्रं विकासं कुर्वन्तु- संस्कृतभारत्याः पश्चिमोत्तरक्षेत्रीयवर्गस्य प्रशिक्षणवर्गस्य शुभारम्भः

4 ग्रामः कृषिश्च यदि सुदृढौ भवेतां, तर्हि राष्ट्रं सुदृढं भविष्यति उपमुख्यमन्त्री- कृषिमन्त्री विजयकुमारसिंह

## भारतीयान्तरिक्षयात्री भारतीयवायुसेनायाः समूहनायकः शुभांशुशुक्लः स्वीयप्रथमायै अन्तरिक्षयात्रायै पूर्णतया सुसन्नद्धो वर्तते



हिमसंस्कृतवार्ताः - भारतीयान्तरिक्षयात्री भारतीयवायुसेनायाः समूहनायकः शुभांशुशुक्लः एक्सिओम्-चतुर्थाभियानान्तर्गतं स्वीयप्रथमायै अन्तरिक्षयात्रायै पूर्णतया सुसन्नद्धो वर्तते। सः सप्ताहद्वयं यावत् अन्ताराष्ट्रियान्तरिक्षस्थानके स्थास्यति। अमेरिकायाः फ्लोरिडायां नासायाः कैनेडी-केन्द्रात् अद्य भारतीयमानकसमयानुसारं सायं द्विपञ्चाशदधिक-पञ्चवादने सः अन्तरिक्षावरोहणं विधास्यति।

## भारत-ऋतुविज्ञान-विभागेन जम्मू-कश्मीरं समेत्य उत्तरभारतस्य विभिन्नेषु स्थलेषु लू इति तापतरङ्गस्य स्थितेः संभावना प्रकटिता



हिमसंस्कृतवार्ताः - भारतस्य ऋतुविज्ञानविभागेन हरियाणा-चण्डीगढ दिल्ली जम्मू-कश्मीर-लद्दाख-पञ्जाब-राजस्थान-उत्तरप्रदेशेषु च जूनमासस्य एकादशदिनाङ्कपर्यन्तं लू इति तापतरङ्गस्य स्थितेः संभावना प्रकटितास्ति। विभागेनोक्तं यत् पश्चिमबङ्गे, ओडिशायां, तमिलनाडुराज्ये पुडुचेरीराज्ये, बिहारे च उष्णार्द्रस्थितिः भवितुमर्हति । अगामिषु त्रिदिवसेषु वायव्य-मध्यभारतयोः अधिकतमं तापमानं द्वाभ्यां समेध्य त्रीणि-डिग्री सेल्सियसमितं भवितुमर्हति तथा च देशस्य अन्येषु भागेषु तापमाने महत्त्वपूर्ण-परिवर्तनं नावलोक्यते विभागेन हरियाणा- दिल्ली-पञ्जाब-पश्चिमराजस्थान पश्चिमोत्तरप्रदेशयोः च एकान्तस्थानेषु धूलिपूर्णवायोः सम्भावना प्रकटीकृता ।

## "सबका साथ, सबका विकास, सबका विश्वास, सबका प्रयास" इत्येतादृशैः मार्गदर्शक-सिद्धान्तैः केन्द्रेण पथप्रदर्शक परिष्काराः विहिताः- प्रधानमन्त्री नरेन्द्रमोदी





हिमसंस्कृतवार्ताः - प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् देशेन विगतेष्वेकादशवर्षेषु विभिन्नक्षेत्रेषु तीव्रपरिवर्तनमवलोकितम् । सहैव एतत् चत्त्वारिंशदधिकैकशत-भारतीयानां सामूहिक प्रयासस्य प्रतिफलमस्ति। केन्द्रे एनडीए-प्रशासनस्य एकादशवर्षपूर्तौ प्रधानमन्त्रिणा मोदिना सबलं प्रोक्तं यत् सबका साथ, सबका विकास, सबका विश्वास, सबका प्रयास इत्येतादृशैः मार्गदर्शक-सिद्धान्तैः केन्द्रेण पथप्रदर्शक परिष्काराः विहिताः। श्रीमोदिना कथितं यत् केन्द्रेण आर्थिक विकासादारभ्य सामाजिकोत्थानं यावत् जनकेन्द्रित-सर्वाङ्गीणप्रगतये ध्यानमाकर्षितम् । प्रधानमन्त्रिणा प्रोक्तं यत् अद्य देशः न केवलं प्रमुखार्थव्यवस्था वर्तते अपितु जलवायु कार्याचरणे, प्राविधिक-नवाचारे, महत्वपूर्णप्रकरणेषु च वैश्विकस्तरे विशिष्टस्थानमावहति। प्रधानमन्त्रिणा नमो ऐप इति तन्त्रांशे उपलब्ध-चलचित्राणां, लेखानां विभिन्नाकर्षकप्रारूपाणां माध्यमेन भारत-विकासयात्रायाः अवगमनार्थं जनाः आमन्त्रिताः। अवधेयमस्ति यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना विगतैकादश वर्षेषु भारतस्य विकासयात्रायाः विषये NaMo App इत्यस्य सर्वेक्षणे भागं ग्रहीतुं सर्वेऽपि आमन्त्रिताः । श्रीमोदी स्वस्य सामाजिकान्तरजालीयपटले पोर्टल्-लिङ्क इत्यपि प्रसारितवान् यत्र यःकोऽपि विगतैकादशवर्षेषु भारतस्य विकास-यात्रायाः विषयेऽवगन्तुं जन-मन-सर्वेक्षणे भागं ग्रहीतुं शक्नोति ।

## वाणिज्योद्योगमन्त्री पीयूषगोयलः आर्थिकव्यापार-सहभागितां सुदृढीकर्तुं स्विट्जर्लेण्ड्-स्वीडेन्-देशयोः यात्राम् कृतवान्



हिमसंस्कृतवार्ताः - वाणिज्योद्योगमन्त्री पीयूषगोयलः आर्थिकव्यापार-सहभागितां सुदृढीकर्तुं स्विट्जर्लेण्ड्-स्वीडेन्-देशयोः यात्रां कृतवान् । सः द्विपक्षीयव्यापारं निवेशं च वर्धयितुं स्विट्जर्लेण्ड्देशे वैश्विकमुख्यकार्यकारीपदाधिकारिभिः उद्योगनेतृभिः सह मिलिष्यति। मन्त्री स्वीडन-देशे आर्थिक-औद्योगिक-वैज्ञानिकसहकार्यस्य भारत-स्वीडिश संयुक्तायोगस्य एकविंशतितम-सत्रस्य सहाध्यक्षतां करिष्यति। एषा यात्रा प्रमुख-यूरोपीय राष्ट्रैः सह सामरिक-आर्थिक-सहभागितां इतोऽपि सुदृढीकर्तुं, सुदृढव्यापार-निवेश-सम्बन्धं च प्रवर्तयितुं, वैश्विक वृद्ध्यै सह-दृष्टेः समर्थनं कर्तुं च भारतस्य दृढप्रतिबद्धतां रेखांकयति ।

## लेफ्टिनेंट जनरल राजीव घईवर्यस्य पदोन्नतिः, भारतीयसेनायां उपसेना प्रमुखः, डीजीएमओ पदे अपि स्थास्यति



भारतीयसेनायाः सैन्यसञ्चालन-महानिदेशकस्य (डीजीएमओ) लेफ्टिनेंट जनरल् राजीवघाई इत्यस्य पदोन्नतिः अभवत्, यः ऑपरेशन सिन्दूर इत्यस्मिन् सफलां भूमिकां निर्वहति स्म । अधुना सः भारतीयसेनायाः उपसेनाप्रमुखत्वेन नियुक्तः अस्ति । उपसेनाप्रमुखत्वेन सः रणनीतिविषयान् पश्यति। उपसेनाप्रमुखः भूत्वा अपि लेफ्टिनेंट जनरल राजीवघाई पूर्ववत् सैन्यसञ्चालनस्य महानिदेशकस्य अर्थात् डीजीएमओ इत्यस्य प्रभारं धारयिष्यति। भारतीयसेनायाम् एतत् महत्त्वपूर्णं पदम् अस्ति । सेनायाः सर्वे परिचालनक्षेत्राणि उपसेनाप्रमुखस्य (रणनीतिः) कार्यालयं प्रति प्रतिवेदनं कुर्वन्ति । तस्मिन् एव काले भारत-पाकिस्तानयोः सैन्यस्तरस्य वार्तायां डीजीएमओ-संस्थायाः नेतृत्वं भवति ।

## सुभाषितम्

**सत्यस्य वचनं श्रेयः सत्यादपि हितं वदेत्।**
**यद्भूतहितमत्यन्तम् ए तत् सत्यं मतं मम॥**

अर्थात्- यद्यपि सत्य वचन बोलना श्रेयस्कर है, तथापि उस सत्य को ही बोलना चाहिए, जिससे सर्वजन का कल्याण हो। मेरे विचार से तो जो बात सभी का कल्याण करती है वही वास्तव में सत्य है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं
7876636263
Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest
h|msanskr|tvartah
Da|ly Sanskr|t Newspaper
every day, wr|te Hello on
7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## अमेरीकायां विरोधे केचन आन्दोलनकारिणः पत्रकाराः च घातिताः



हिमसंस्कृतवार्ताः - कैलिफोर्नियायां व्याप्तस्य आप्रवासन-अभियानस्य विरुद्धं नवीनतम प्रदर्शनेषु लॉस एन्जल्स-नगरस्य मध्यभागे सहस्राधिकाः आन्दोलनकारिणः नैशनल गार्ड्स इति राष्ट्रिय-रक्षक-सैनिकैः सह संघर्षं कृतवन्तः। आप्रवासन-सीमाशुल्क-प्रवर्तन-संस्थायाः प्रतिनिधिभिः सह राष्ट्रिय-रक्षक-सैनिकाः जनसमूहं विकीर्णं कर्तुं बहुवारं अश्रु-धूम-ग्रेनेड्-इत्येतयोः प्रहारं कृतवन्तः। अस्मिन् सङ्घर्षे केचन आन्दोलनकारिणः पत्रकाराः च घातिताः। अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः गृहसुरक्षासचिवं रक्षासचिवं च व्यवस्थां पुनः स्थापयितुं सर्वाणि आवश्यकानि कार्याणि कर्तुं निर्देशं प्रदत्तवान्।

# HPCM- शोङ्गटोङ्ग- परियोजनायाः पूर्णतायै नवम्बर २०२६ तमस्य वर्षस्य लक्ष्यम्



**हिमसंस्कृतवार्ताः- किन्नौरः।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः आगामिवर्षे नवम्बर २०२६ तमे वर्षे हिमाचलप्रदेश- विद्युत्निगमस्य शोङ्गटोङ्गपरियोजनायाः सम्पन्नीकरणस्य लक्ष्यं अधिकारिभ्यः दत्तवान्। इदानीं परियोजनायां विलम्बः न भवेत् इति मुख्यमन्त्री अधिकारिभ्यः स्पष्टतया निर्देशं दत्तवान्। मुख्यमन्त्री उक्तवान् यत् हिमाचलप्रदेशः अस्याः परियोजनायाः महतीं लाभं प्राप्नुयात्। एषा परियोजना आत्मनिर्भरं हिमाचलं निर्मातुं सहायकं सिद्धं भविष्यति। सोमवासरे शोङ्गटोङ्ग-क्षेत्रस्य परियोजनास्थलं गच्छन् मुख्यमंत्री-महोदयेन अधिकारिणः कार्ये शिथिलतां न कुर्वन्तु इति आह। सः निर्माणसंस्थायाः अधिकारिभ्यः अपि शीघ्रमेव परियोजनां सम्पन्नं कर्तुं पृष्टवान्। मुख्यमन्त्री अस्याः ४५० मेगावाट क्षमतायुक्तस्य परियोजनायाः विद्युत्गृहं गत्वा तत्र प्रचलन्तीनां व्यवस्थानां परिचयं कृतवान्।
तदनन्तरं मुख्यमन्त्री बैरेजस्थलं गत्वा तत्रत्यै अधिकारिभिः सह वार्तालापं कृतवान्। मुख्यमन्त्री उक्तवान् यत् शोङ्गटोङ्गः पूर्वमेव प्रायः २० वर्षाणां विलम्बेन निर्मिता परियोजना अस्ति। आगामिवर्षे अस्य परियोजनायाः निर्माणं सम्पन्नं भविष्यति। अस्य निर्माणकार्ये अनेकानि कष्टानि सम्मुखीकृतानि अधुना सर्वकारः इच्छति यत् काऽपि समस्या न उत्पद्येत्, एषा परियोजना शीघ्रमेव सम्पन्नः भवेत्। अवधेयं वर्तते यत् काशङ्ग- विद्युत्-परियोजनायाः, सावड़ा-कुड्डु-परियोजनायाः च अतिरिक्तं सैन्ज-परियोजनायाः निर्माणं पूर्वं विद्युत्-निगमेन सम्पन्नम् अस्ति। एताभ्यः त्रिभ्यः परियोजनाभ्यः हिमाचलप्रदेशः यदा बहु विद्युत् प्राप्नोति, तत्र सर्वकारीयसंस्था अपि महान्तम् आयं अर्जयति। आगामिसमये निर्माणाधीनपरियोजनानां कार्यं सम्पन्नं कृत्वा हिमाचलविद्युत्निगमः सर्वकारस्य बृहत्तमः अर्जनपुत्रः भवितुम् अर्हति।
स्वस्य भ्रमणकाले मुख्यमन्त्री स्पष्टतया अवदत् यत् विद्युत्मण्डलं विद्युत्निगमं च नूतनानां परियोजनानां निर्माणे पूर्णतया समर्थाः सन्ति। यद्यपि एतेषां सर्वकारीय-उपक्रमानाम् क्षमतायाः विषये प्रश्नाः उत्पद्यन्ते, परन्तु वर्तमानसर्वकारेण तेभ्यः कार्यं कर्तुं पूर्णः अवसरः दत्तः अस्ति । मुख्यमन्त्री उक्तवान् यत् अनेकाः परियोजनाः विद्युत्निगमाय समर्पयिष्यन्ते। विद्युत्निगमः न केवलं जलविद्युत्क्षेत्रे अपि तु सौरशक्त्या अपि बृहत्तमा संस्था भविष्यति। मुख्यमन्त्री उक्तवान् यत् हिमाचलप्रदेशे जलरूपेण अमूल्यं धनं वर्तते, यस्य सम्यक् शोषणं कर्तव्यम्। अत्र एतत् अपि ज्ञातव्यं यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः स्वस्य कार्यकालस्य तृतीयवर्षे क्रमशः विद्युत्निगमस्य अस्याः परियोजनायाः कार्यस्य निरीक्षणार्थं तृतीयवारं गतवान् आसीत्। मुख्यमन्त्री उक्तवान् यत् अधुना परियोजनायाः कार्यं द्रुतगत्या प्रचलति, सन्तोषजनकं च अस्ति।

# प्रधानमन्त्रिणः नेतृत्वे सर्वकारेण प्रदर्शनाधारित-राजनीतिं संस्थाप्य देशस्य राजनैतिकसंस्कृतिः परिवर्तिता - केन्द्रीयमन्त्री जेपी-नड्डा



हिमसंस्कृतवार्ताः - केन्द्रीयमन्त्रिणा भाजपाध्यक्षेण जेपी नड्डा इत्यमुना प्रोदीरितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे सर्वकारेण प्रदर्शनाधारित-राजनीतिं संस्थाप्य उत्तरदायित्वपूर्णं कर्तव्यपरायण-सर्वकारं प्रदाय देशस्य राजनैतिकसंस्कृतिः परिवर्तिता। मोदी-सर्वकारस्य एकादशवर्षपूर्त्यवसरे नवदिल्ल्यां वार्ताहरान् सम्बोधयन् श्रीनड्डा इत्यमुना कथितं यत् यत् सर्वकारेण देशस्य राजनैतिक-परिदृश्यं परिवर्त्य नूतनोपक्रमः सञ्चालितः। श्रीनड्डा इत्येषः एनडीए-सर्वकारस्य साहसिक-निर्णयक्षमता प्राशंसयत्। श्रीनड्डावर्येण आरोपितं यत् चतुर्दशाधिक-द्विसहस्त्रतमवर्षात् प्राक् प्रशासनानि भ्रष्टाचारलिप्तानि आसन्। सहैव सर्वत्र नकारात्मकतायाः वातावरणम् आसीत्।भाजपाध्यक्षेण कथितं यत् नरेन्द्रमोदी-सर्वकारेण सबका साथ, सबका विकास, सबका विश्वास और सबका प्रयास इत्येतत् सिद्धान्तमाश्रित्य कार्यं कृतम् । विगते एकस्मिन् दशके सर्वकारेण समाजस्य विविधवर्गेभ्यः कार्यं कृतम्। सहैव सर्वकारेण महिलानेतृत्वयुतस्य विकासदृष्टिकोणस्य समेधनार्थं बलं प्रदत्तम् ।

# मण्डीजनपदस्य शिवधामप्रकल्पः नवम्बर् 2026 तमे मासे सम्पूर्णः भविष्यति, देशे द्वितीयम् अतीवोच्चं शिवलिङ्गं निर्मीयते



**हिमसंस्कृतवार्ताः डॉ पद्मनाभः।**
लघ्वीकाशी मण्डी। लघ्वीकाश्यां मण्ड्यां दिव्यं शिवधामं निर्मातुं कार्यं नवम्बर् 2026 पर्यन्तं पूर्णं भविष्यति। हिमाचलप्रदेशपर्यटनविकासनिगमेन (एचपीटीडीसी) त्रयाणां वर्षाणां अनन्तरं शिवधामस्य द्वादशज्योतिर्लिङ्गानां प्रतिकृतिसंरचनानाम्, स्थलविकासस्य च, ज्योतिर्लिङ्गसम्बद्धमार्गनिर्माणार्थं च नूतनं २५.५ कोटिरूप्यकाणां निविदा स्वीकृतः।अद्यावधि शिवधामे पञ्चानां ज्योतिर्लिङ्गानां निर्माणं सम्पन्नम्। पूर्वमुख्यमन्त्री जयरामठाकुरेण २७ फरवरी २०२१ तमे दिने काङ्गणीधार (मण्डी) इत्यत्र शिवधामस्वप्नप्रकल्पस्य शिलान्यासः कृतः। प्रथमे चरणे प्रतिकृतिसंरचनायाः कृते ५०.२२ कोटिरूप्यकाणां व्ययः निर्धारितः। महाराष्ट्रराज्यस्थितया एका कम्पन्या त्र्यम्बकेश्वरः, मल्लिकार्जुनं, ओंकारेश्वरः, सोमनाथः, नागेश्वरः इत्येतेषां ज्योतिर्लिङ्गानां रूपनिर्माणं नवहेक्टेयर् क्षेत्रे कृतम्।षष्ठम्, सप्तमम्, अष्टमं च ज्योतिर्लिङ्गमन्दिराणां मूलसंरचनायाः षष्टिशतांशं कार्यं केवलं पूर्णं जातम् यावत् तस्याः कम्पन्याः विरुद्धं अनियमितता दृष्टा। सितम्बर २०२२ तः निर्माणकार्यं स्थगितम्। अगस्त २०२४ मासे परियोजनायाः पुनः निविदायाः प्रक्रिया आरब्धा, किन्तु कम्पन्योरन्तर्गतानां विवादानां, प्रलेखेषु च दोषानां कारणेन, फरवरी २०२५ तमे मासे न्यायद्वारा प्रक्रिया पुनरपि निरस्तता। ततः मार्च् २०२५ तमे मासे परियोजनायाः कृते नूतना निविदा आविष्टा। तत्र त्रयः कम्पन्यः सम्मिलिताः। अन्ते मण्डीनगरे स्थितायै KD Infrastructure Pvt. Ltd इत्यस्यै संस्थायै परियोजनां समये पूर्णं कर्तुं दायित्वं प्रदत्तम्।
उल्लेखनीयम् यत् परियोजनायाः द्वितीये चरणे शिवधामस्य सौन्दर्यवर्धनस्य कृते (अधोसंरचनाविकासः) प्रायः १५० कोटिरूप्यकाणां व्ययः भविष्यति। एचपीटीडीसी संस्थायाः प्रबन्धनिर्देशकः डॉ. राजीवशर्मा इत्यनेन उक्तं यत् शिवधामप्रकल्पस्य निविदा स्वीकृता अस्ति।

## भव्यं दिव्यं शिवधामं, अद्वितीयं स्वरूपम्

शिवधामे प्रवेशाय कैलासद्वारे भगवतः गणेशस्य भव्यप्रतिमा स्थाप्यते, यत्र मण्डीचित्रशैलीं काष्ठकुणीशिल्पं च द्रष्टुं शक्यते। 'शिववन्दना' इत्याख्यया एकं ओरियंटेशनकेन्द्रं भविष्यति। तत्र गङ्गाकुण्डम्, मानसरोवरकुण्डम्, मोक्षमार्गः, बिल्वपत्रकुण्डम्, रुद्रमण्डलं, डमरुमण्डलं, शिवस्मृतिसंग्रहालयः च भविष्यन्ति। द्वादशज्योतिर्लिङ्गानां दर्शनं, मातुः पार्वत्याः, कार्तिकेयस्य च प्रतिमाः च भविष्यन्ति। एषः शिवधामः मण्डीनगरनिवासिनां कृते श्रद्धायाः मुख्यकेंद्रं भविष्यति।

## १०८ अङ्गुलोन्नतः शिवलिङ्गम् भविष्यति

देशे अतीवोच्चं शिवलिङ्गं केरलराज्ये तिरुवनन्तपुरंनगरे माहेश्वरं श्रीशिवापार्वतीमन्दिरे १११.२ अङ्गुलोन्नतम् अस्ति। तस्मात् न्यूनः १०८ अङ्गुलोन्नतं शिवलिङ्गं छत्तीसगढराज्ये भूतेश्वरमहादेवमन्दिरे अस्ति। मण्ड्यां शिवधामे अपि १०८ अङ्गुलोन्नतं शिवलिङ्गं निर्मीयते।

# रूसस्य आक्रमणैः यूक्रेनस्य बहूनि नगराणि क्षतिग्रस्तानि अभवन्, 500 ड्रोनास्त्रैः आक्रमणम्



रूस-युक्रेनयोः मध्ये त्रिवर्षीययुद्धे युक्रेन-देशस्य कृते गतरात्रिः अतीवभयङ्कराः आसीत्, यदा रूस-देशः युक्रेन-देशे अद्यावधि ४७९ ड्रोन्-विमानैः २० क्षेपणास्त्रैः च बृहत्तमं वायु-आक्रमणं कृतवान् अस्मिन् आक्रमणे देशस्य मध्यपश्चिमप्रदेशयोः लक्ष्यं कृतम् इति युक्रेनदेशस्य वायुसेना अवदत्। अधुना एव युक्रेनदेशेन रूसस्य विमानस्थानकं लक्ष्यं कृतम् आसीत् तदनन्तरं च एतत् आक्रमणं अतीव महत् इति मन्यते। युक्रेनदेशस्य वायुसेना वायुसेना २७७ ड्रोन्, १९ क्षेपणास्त्राणि च नष्टवती इति पुष्टिः अकरोत् ।युक्रेनदेशस्य पुष्ट्यानुसारं १० ड्रोन्, क्षेपणास्त्राः च स्वलक्ष्यं प्राप्तुं समर्थाः अभवन् । अस्मिन् आक्रमणे एकः व्यक्तिः घातितः अस्ति । परन्तु एतेषां युक्रेनदेशस्य पुष्ट्या किमपि प्रकारेण प्रतिपुष्टिः न कृता । युक्रेनदेशं रक्षितुं वायुरक्षायाः आवश्यकता वर्तते युक्रेनदेशस्य राष्ट्रपतिः जेलेन्स्की इत्यनेन उक्तं यत् पूर्वीय-ईशान-मोर्चायां स्थितिः अतीव दुर्गता अस्ति। रूसी-आक्रमणानां क्षतिविषये सः बहु सूचनां न दत्तवान् । युक्रेनदेशाय पाश्चात्यसहयोगिनां अधिकसाहाय्यस्य आवश्यकता वर्तते, विशेषतः वायुरक्षाव्यवस्थारूपेण, परन्तु अमेरिकीनीतिविषये अनिश्चिततायाः कारणात् स्थितिः अन्धकारमयः एव अस्ति

## CM Sukhu: विमलनेगी-मृत्युप्रकरणे यः कोऽपि दोषी भविष्यति सः कारागृहं गमिष्यति




हिमसंस्कृतवार्ताः - किन्नौरः।मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् विमलनेगी इत्यस्य प्रकरणे भाजपा राजनीतिं कुर्वन् अस्ति। अस्मिन् सन्दर्भे कोऽपि कस्यचित् तारणं न करोति। यः दोषी भवति सः कारागृहं गमिष्यति। न्यायालयस्य आदेशेन सीबीआई अन्वेषणं क्रियते। पुलिसस्य एसआइटी इत्यनेन अपि सम्यक् अन्वेषणं कृतम् अस्ति। सर्वकारेण एकः अधिकारी तत्क्षणमेव अपृष्ठा निलम्बितम्। यदा मीणां स्थानान्तरणं कर्तुं प्रार्थितः तदा तदपि कृतम् । वयं ह्यः अपि परिवारेण सह स्थितवन्तः अद्य अपि तैः सह तिष्ठामः। मुख्यमंत्री सुक्खुः कल्पायां जनसभायां भाजपायाः विषये आक्रामकं पक्षं स्वीकृत्य उक्तवान् यत् भाजपा जनानां कोषतः धनं चोरयित्वा भ्रष्टाचारस्य पृष्ठद्वारेण लुण्ठितवती अस्ति। एतत् सर्वं सर्वकारः अन्वेषणं कुर्वन् अस्ति। मुख्यमंत्री उक्तवान् यत् युनां कृते जीविकां प्रदातुं सर्वकारः अस्मिन् वर्षे २५ सहस्रनियुक्त्यः कुर्वन् अस्ति। आगामिसमये कल्पायः त्रिष्वपि पंचायतेषु महिलानां कृते प्रतिमासं १५०० रुप्यकाणि प्रदत्तानि भविष्यन्ति।मुख्यमंत्री सुखविन्दरसिंहसुक्खुः अवदत् यत् यदा वर्तमानसर्वकारः सत्तां प्राप्य मन्त्रिमण्डलस्य शपथं गृहीतवान् तदा प्रथमे एव मन्त्रिमण्डले ओपीएस-कार्यन्वयनस्य अनुमोदनं कृतवान्। सर्वकारीयकर्मचारिभ्यः प्रतिज्ञां तेन पूर्णा अभवत् । सः अवदत् यत् १,३६,००० सर्वकारीयकर्मचारिभ्यः पुरातनं पेन्शनं दत्तम्। पुरातनं पेन्शनं सर्वकारीयकर्मचारिभ्यः अधिकारिभ्यः च दत्तमात्रं जयरामसर्वकारे यत् प्रतिवर्षं १६०० कोटिरूप्यकाणि प्राप्यन्ते स्म तत् न्यूनीकृतम्।

## केन्द्रीयमन्त्रिणा नितिनगडकरिणा सह अमिलत् विक्रमादित्यसिंहः



हिमसंस्कृतवार्ताः- नवदेहली। लोकनिर्माणमन्त्री विक्रमादित्यसिंहः नवदेहल्यां केन्द्रीय भूपरिवहनमन्त्री नितिन गडकरी इत्यनेन सह मिलितवान्। समागमे सः केन्द्रीयमन्त्रिणः आग्रहं कृतवान् यत् भूभुजोत-आन्तर्भौममार्गसहितं घटासनी- शिल्हा- बधानी- भूभुजोत- कुल्लूमार्गस्य सामरिकमहत्त्वं दृष्ट्वा राष्ट्रियराजमार्गरूपेण घोषयतु। सः अवदत् यत् एषः मार्गः रक्षासम्बद्धसामग्रीणां सुचारुगतेः कृते उत्तमः मार्गः सिद्धः भविष्यति, यात्रायाः दूरी ५५ किलोमीटरमितं न्यूनीकरिष्यति च।लोकनिर्माणमन्त्री ढलीतः रामपुरपर्यन्तं एनएच-०५ इत्यस्य चतुर्ष्पंक्तिराजमार्गस्य निर्माणकार्यं प्राथमिकतायां भवेत् इति अनुरोधं कृतवान्। राजमार्गेषु सम्प्रति प्रचलति निर्माणकार्यं शीघ्रमेव सम्पन्नं कर्तुं अपि सः आग्रहं कृतवान्। सः केन्द्रीयमन्त्रिणं सूचितवान् यत् राज्यसर्वकारेण प्रधानमन्त्रिगतिशक्तौ पञ्च राष्ट्रियराजमार्गाः समाविष्टाः इति अनुरोधः कृतः। अस्मिन् विषये अनुमोदनं दातुं सः आग्रहं कृतवान्।विक्रमादित्यसिंहः सीआरएफ-अन्तर्गतं १३० कोटिरूप्यकाणां धनं शीघ्रं विमोचयितुं, राज्ये सीआरएफ-कार्यस्य वार्षिकसीमां २५० कोटिरूप्यकाणि यावत् वर्धयितुं च अनुरोधं कृतवान्। नितिन गडकरी इत्यनेन आग्रहाः ध्यानपूर्वकं श्रुत्वा सर्वसम्भवसहायतायाः आश्वासनं दत्तम्। सः ढल्ली-रामपुर- चतुर्ष्पंक्तिराजमार्ग- परियोजनायै सिद्धान्ततः अनुमोदनम् अपि दत्तवान्।

# संस्कृतभाषया राष्ट्रस्य समग्रं विकासं कुर्वन्तु-

## संस्कृतभारत्याः पश्चिमोत्तरक्षेत्रीयवर्गस्य प्रशिक्षणवर्गस्य शुभारम्भः



हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, मेरठम्।संस्कृतभारतीक्षेत्रीयः आवासीय-प्रशिक्षणवर्गः बालेरामवृजभूषण- कमलादेवी- विद्यामन्दिरे, शास्त्रीनगरे मेरठनगरे प्रारब्धः। उद्घाटनसमारोहः दीपप्रज्वलनं घ मान्यवरातिथेः कराभ्यां सम्पन्नः।प्रास्ताविकभाषणे प्रभाकरत्रिपाठी (मेरठप्रान्तमन्त्री) स्वभाषणे संस्कृतभारत्याः उद्देश्यं विस्तरेण विवृतवान्। सः उक्तवान् यत् गतपञ्चचत्वारिंशत्संवत्सराणां यत्नेन दशकोटिजनान् देशे विदेशे च संस्कृतभाषायां वक्तुं समर्थं कृतवती। इत्यसौ महनीयः कार्यसिद्धिः। "वसुधैव कुटुम्बकम्" इत्यस्मिन् भावे स्थित्वा विश्वस्य कल्याणाय संस्कृतभारती चरमं लक्ष्यं पश्यति।मुख्यवक्तृत्वे डॉ॰ वाचस्पतिमिश्रः उक्तवान् यत् "लक्ष्यम् अवश्यं स्मर्तव्यम्– एकं लक्ष्यम्, एका भाषा, जनजनस्य भाषा संस्कृतभाषा इति।

मुख्यातिथिः महापौरः हरिकान्तः अहलुवालिया छात्रान् सम्बोध्य उक्तवान् यत् "एषः देशः भवतां हस्तयोः अस्ति। भवन्तः संस्कृतभाषया राष्ट्रस्य समग्रं विकासं कुर्वन्तु इति। वर्गाधिकारी राजगोपालवर्यः सर्वान् प्रेरितवान् यत् सर्वे अपि संस्कृतभाषायामेव संवादं कुर्वन्तु।धन्यवादकथनं इशेन्द्रः पारासरः कृतवान्। अशीतिछात्राः शिविरे संस्कृतसम्भाषणपूर्वकं भाषाप्रबोधने शिक्षणं प्राप्नुवन्ति। वर्गमार्गदर्शकेषु डॉ॰ देवेन्द्रपण्ड्या क्षेत्रसंगठनमन्त्री, गिरीश तिवारी उत्तराखण्ड- प्रान्तमन्त्री योगेशविद्यार्थी प्रान्तसंगठनमन्त्री, संदीपकुमारः, कुलदीपमैन्दोला, नीरजः, पूनमः, आकाशः, नीलकमलः, सन्तोषः, तरुणः, डॉ. नरेन्द्र तेवतियाः, अंकितः आदयः शिक्षणरताः सन्ति। एवं मेरठनगरे संस्कृतभारती-प्रशिक्षणवर्गस्योद्घाटनं सम्पूर्णं राष्ट्रं संस्कृतभाषायाः माध्यमेन एकीकर्तुं, संस्कृतिचेतनां प्रसारयितुं च अत्यन्तं सफलतमप्रयासे संलग्नोऽस्ति।

## सर्वे संस्कृतेन सम्भाषणं कर्तुं समर्थाः भवन्तु इत्युद्देश्यं 'संस्कृतभारत्याः'- प्रान्तमंत्री गिरीशतिवारी



हिमसंस्कृतवार्ताः-संस्कृतभाषा सर्वासां भाषाणां पोषिका रक्षिका च अस्ति, यतः तस्या व्याकरणं शब्दार्थविज्ञानं च अस्ति। अस्माकं राष्ट्रे राष्ट्रभाषा रूपेण का अपि भाषा नास्ति, यद्यपि सर्वासां भाषाणां जननी संस्कृतैव अस्ति। हिब्रूभाषिणः जनाः स्वभाषां पुनर्जीवितवन्तः, तेन रूपेणैव 'संस्कृतभारती' अपि तत् लक्ष्यम् उपनिनाय यत् संस्कृतभाषा आन्तरराष्ट्रीयभाषारूपेण व्यवहाराय च विश्वकल्याणाय च सम्भाषणान्दोलनस्य रूपेण प्रचर्यताम्।बौद्धिकसत्रे संस्कृतभारत्याः प्रान्तमन्त्री गिरीशतिवारी महोदयः उत्तरपश्चिमक्षेत्रस्य आवासीयप्रशिक्षणवर्गे प्रेरणां प्रदत्तवान्। ते उक्तवन्तः यत् संस्कृतस्य सम्भाषणस्वरूपस्य संवर्धनं कुर्वन्तः कार्यकर्तारः समर्पितजीवनं यथार्थतः यान्ति। अद्य यत् समाजे संस्कृतभाषायां सम्भाषणं दृश्यते, तस्य मूलं संस्कृतभारत्याः कार्यकर्तृणां यत्नः एव अस्ति।

## ""अप्रसक्तनिषेधन्यायः"

एकस्य वाक्यस्य वाक्यान्तरेण सह सम्बन्धः भवति चेत् तत्र निषेधस्य शक्यता भवति। यदि कोऽपि संबन्ध एव नास्ति तर्हि निषेधः अशक्यः भवति इति अनेन न्यायेन सूच्यते। यथा- पुष्पाणि प्रातः विकसन्ति सन्ध्यासमये न। अयं प्रसक्तस्य निषेधः। यतः पुष्पाणां विकासः इत्ययं प्रसक्तः विषयः वर्तते। अन्धकारस्य वर्णः शुभ्रः न भवति इति अप्रसक्तनिषेधः।

डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्



रचयिता - डॉ. रुरुकुमारमहापात्रः (अध्यापकः) राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## कियदीप्साम्यहं त्वयि हृद्-विधातुं शम्

**कितनी हसरत है हमें तुमसे दिल लगाने की")**

M - कियदीप्साम्यहम्<br>
त्वयि/ त्वया/ त्वय्या (त्वयि+आ)<br>
हृद्-विधातुं शम्<br>
कियदीप्साम्यहम्<br>
त्वयि हृद्-विधातुं शम्<br>
पार्श्वे स्यां ते प्रियेऽहम्<br>
हृदयेऽपि रन्तुं शम्/ हृदये विरन्तुं शम्<br>
मे हृद्-विवाचमहो<br>
वक्ष्ये क्व ह, वक्ष्ये क्व ह<br>
कियदीप्साम्यहम्<br>
त्वयि हृद्-विधातुं शम्<br>
पार्श्वे स्यां ते प्रियेऽहम्<br>
हृदयेऽपि रन्तुं शम् ------ (००)<br>
M - जानेऽहं जाने विभा त्वं मे<br>
मेऽपि हृच्छ्वासनिभा त्वं मे<br>
जानेऽहं जाने विभा त्वं मे<br>
मेऽपि हृच्छ्वासनिभा त्वं मे<br>
हेतुकाऽसि श्वासीये मे<br>
प्रेयसी आसीह त्वं मे<br>
मे हृद्-विवाचमहो<br>
वक्ष्ये क्व ह,वक्ष्ये क्व ह<br>
कियदीप्साम्यहम्<br>
त्वयि हृद्-विधातुं शम्<br>
पार्श्वे स्यां ते प्रियेऽहम्<br>
हृदयेऽपि रन्तुं शम् - (०१)<br>
F - कियदीप्साम्यहम्<br>
त्वयि हृद्-विधातुं शम्<br>
पार्श्वे स्यां ते प्रियोऽहम्<br>
हृदयेऽपि रन्तुं शम्<br>
मे हृद्-विवाचमहो<br>
वक्ष्ये क्व ह,वक्ष्ये क्व ह<br>
कियदीप्साम्यहम्<br>
त्वयि हृद्-विधातुं शम् - (०२)<br>
F - सुमगन्धिः समीरे वै<br>
अहं मत्ताऽसीहाऽनुकान्ते<br>
M - मे ह्यास्मृतौ स्वापे त्वं च<br>
नेत्रयोः त्वं वै हे राजेः<br>
F - ए मे नु प्रार्थना हे ईश<br>
सदाऽहम् आश्रये प्रिय हे<br>
मे हृद्-विवाचमहो<br>
वक्ष्ये क्व ह,वक्ष्ये क्व ह<br>
M - कियदीप्साम्यहम्<br>
त्वयि हृद्-विधातुं शम्<br>
F - पार्श्वे स्यां ते प्रियोऽहम्<br>
हृदयेऽपि रन्तुं शम्<br>
M - मे हृद्-विवाचमहो<br>
वक्ष्ये क्व ह,वक्ष्ये क्व ह -- (३)

## KKSU Ramtek: कविकुलगुरुः कालिदाससंस्कृत- विश्वविद्यालये सामाजिक- वनविभागस्य सहयोगेन वृक्षारोपणम्



**हिमसंस्कृतवार्ताः- नागपुरम्।** कविकुलगुरुः कालिदाससंस्कृत- विश्वविद्यालयः, रामटेकम् इत्यनेन पर्यावरणदिवसस्योपलक्ष्ये विश्वविद्यालयपरिसरे वृक्षाः रोपिताः। विश्वविद्यालयस्य परिसरः हरितवर्णीयः अस्ति। आदरणीयप्रधानमन्त्री श्री नरेन्द्र मोदी इत्यनेन प्रारब्धस्य 'एकः वृक्षः मातुः नाम्ना' अभियानस्य अनुरूपं कालिदाससंस्कृत- विश्वविद्यालयस्य कुलपतिः रामटेक परिसरे वृक्षारोपणं कृतवान्। रामटेकस्य विश्वविद्यालयपरिसरः हरितवर्णीयः अस्ति, तस्य हरितत्वस्य कृते सर्वप्रयत्नाः क्रियन्ते। एतदर्थं पारम्परिकवृक्षारोपणेन सह मियावाकीवनस्य अवधारणा कार्यान्वितं कृत्वा कस्मिन्चित् क्षेत्रे वृक्षारोपणं कृतम् अस्ति। शुद्धं प्राणवायुः प्रदातुं परिसरं हरितं स्थापयितुं च एषा विशेषा योजना अस्ति। एतदतिरिक्तं पृथक् स्थाने भृङ्गाणां कृते उद्यानं निर्मितम् अस्ति। विश्वपर्यावरणदिवसस्य अवसरे विश्वविद्यालयपरिसरस्य हरितीकरणस्य लक्ष्यं पुनः सिद्धम् अभवत्। पर्यावरणदिवसस्य अवसरे प्रो. हरेरामः त्रिपाठी विशेषोपस्थितौ वृक्षारोपणं विहितम्। अस्य अभियानाय सामाजिक- वनीकरणविभागस्य वनपालः आर. आर. शुक्ला, वनपालः एन. एन. केन्द्रे एवं तस्य सहयोगी धारणे इत्यस्य सहयोगः प्राप्तः। तेषां विशेषसन्निधिना आम्रवृक्षाः च रोपिताः।अस्मिन्नवसरे अवसरे विश्वविद्यालयस्य पुस्तकालयकर्मी डॉ. दीपक कापाडे, परीक्षानियंत्रकः, डॉ. केशवमोहरीरः, - प्रशासनिकाधिकारी, उपरजिस्ट्रार, डॉ. रोशन अलोन, डॉ. स्मिता फडणवीस, सहायक रजिस्ट्रार, श्रीपद अभिनकरः, उप अभियंता, संतोष वाडीकरः, विजयजमनकरः च उत्साहपूर्वकं भागं स्वीकृतवन्तः वृक्षारोपणाभियाने च वृक्षाः रोपिताः। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य उद्यानविभागात् विशेषसहकार्यं प्राप्तम्।

## ग्रामः कृषिश्च यदि सुदृढौ भवेतां, तर्हि राष्ट्रं सुदृढं भविष्यति उत्तरप्रदेशबिहारयोः ऐक्यमपि देशस्य अर्थव्यवस्थां परिवर्तयितुं शक्नोति- उपमुख्यमन्त्री- कृषिमन्त्री विजयकुमारसिंह



**हिमसंस्कृतवार्ताः- अंकुश कुमारः।** आचार्यनरेन्द्रदेव- कृषिप्रौद्योगिक- विश्वविद्यालयस्य एग्रिबिजनेस्मेनेज्मेण्ट- सभाभवने आयोजिते विकसित- कृषिसंकल्पाभियाने भाषमाणः माननीय उपमुख्यमन्त्री विजयकुमारसिंह अवदत्। "अस्माकं सम्पूर्णा सभ्यता कृषेः अधीना एव वर्तते। अस्माकं पर्वाणि, उत्सवाः, संस्काराश्च अपि कृषेः अनुगुणाः भवन्ति।" ते अवदन् यत् "कृषिः चमत्कारशक्तिरूपा अस्ति। एकस्मिन्नेव बीजे निक्षिप्ते सहस्रशः फलानि सम्भवन्ति। अतः विज्ञाननिष्ठकृषेः विकासः अत्यावश्यकः। बिहार-उत्तरप्रदेशयोः ऐक्यं सम्पूर्णदेशस्य अर्थव्यवस्थायाः कायाकल्पाय समर्थं भवेत्। बिहारराज्ये मक्कायाः, धान्यस्य, गोधूमस्य च उत्पादनं द्विगुणं जातम्।""बिहारः केवलम् उत्पादकः न, अपि तु निर्यातकः अपि स्यात्। मृत्तिकायाः स्वास्थ्यरक्षणं, जलसञ्चयस्य संवर्धनं च अत्यावश्यकम्। अस्माकं संस्कृति अपि कृषेः अधीना एव," इति ते स्मारयामास।राजा जनकस्य दृष्टान्तं दत्त्वा ते अवदन्- "राजा जनकः स्वयं अकाले भूमिं कर्षितवान् आसीत्। सीमान्तकृषकानां बहुल्ये अपि, बिहारे कृषिक्षेत्रे सकारात्मकाः परिणामाः दृश्यन्ते।"अस्मिन् राष्ट्रव्यापके अभियाने द्विसहस्राधिकाः वैज्ञानिकाः, शताधिकाः अनुसंधानसंस्थाः, सप्तशताधिकानि कृषिविज्ञानकेन्द्राणि च सक्रियतया भागं गृह्णन्ति।अस्य अभियाने मुख्यं लक्ष्यं "वैज्ञानिककृषेः साहाय्येन उत्पादकत्वस्य वर्धनम् इति।" एषः संवादः पञ्चषष्टिसहस्रग्रामेषु कृषकेभ्यः सह सम्पद्यते। विकसितभारतस्य २०४७तमवर्षस्य लक्ष्यं सुलभतया सिध्यति।अयोध्यायां स्थिते आचार्यनरेन्द्रदेव- कृषिप्रौद्योगिकविश्वविद्यालये आयोज्यमाने कार्यक्रमे उपमुख्यमन्त्री भगवतः रामस्य पुण्यभूमौ उपस्थितानां शतशः कृषकेभ्यः सह संवादं कृतवन्तः।नवप्रवर्तनानि चर्चितानि, कृषकाणाम् अनुभवाः श्रुताः, समस्याः समाधानानि च विचारितानि। कृषकानां सम्मानं कृत्वा तेषां गौरवाय नमनं कृतम्।तेनोक्तं यत् "एषः केवलं संवादः न अस्ति, किन्तु सशक्तभारतस्य निर्माणाय संकल्पग्रहोऽपि अस्ति।"ते उत्तरप्रदेशस्य कृषिमन्त्री सूर्यप्रतापशाही, विश्वविद्यालयस्य कुलपति कर्नल डॉ. बिजेन्द्रसिंह च आयोजकवर्गं हृदयतः अभिनन्द्य अवदन् "एषः संवादमञ्चः आत्मनिर्भरभारतस्य संकल्पं दृढीकृतवान्।"ते स्मारयामासुः "आचार्यनरेन्द्रदेवः केवलं नाम न, अपि तु एकः विचारः आसीत्। सः स्वातन्त्र्यसंग्रामसेनानी, शिक्षाविद्, कृषकश्रमिकानां च प्रियतमः आसीत्। तेन सदा उक्तं यत् ग्रामे परिवर्तनं विना राष्ट्रे परिवर्तनं न सम्भवः।"तस्य वाक्यानि अतिगम्भीराणि आसन्। "कृषकः केवलम् अन्नदाता न, अपि तु राष्ट्रनिर्माता अपि।" "ग्रामक्षेत्रे यदि दृढता स्यात्, तर्हि भारतः अपि आत्मनिर्भरः भविष्यति।" "कृषिः केवलं जीविकोपायः न, अपि तु संस्कृति, श्रद्धा, आत्मनिर्भरत्वस्य आत्मा एव।"

### बिहारसरकारेण कृषिक्षेत्रे प्रवर्तिताः योजनाः अपि तेन उद्घोषिताः

बीजगुणवत्तायाः सुनिश्चित्यै प्रत्येकजिले एकस्य बीजकेन्द्रस्य स्थापना। कृषेः उद्योगे संयोजनं, यत्र कृषकः उत्पादकः, प्रसंस्कर्ता च, निर्यातकः च भवति। फसलविविधीकरणं, मूल्यसंवर्धनं च मक्का-शाक-फलादीनां संवर्धनेन। डिजिटलकृषिमिशनः, ड्रोन- उपग्रह- कृत्रिमबुद्धियुक्ततन्त्रज्ञानस्य प्रयोगः।



## संस्कृतभारती, सौराष्ट्रप्रान्तस्य प्रान्तकार्यकर्तृ- अभ्यासवर्गः सुरेन्द्रनगरे सञ्जातः



हिमसंस्कृतवार्ताः- जगदीश डाभी, सुरेन्द्रनगरम्, गुजराततः)संस्कृतभारती, सौराष्ट्रप्रान्तस्य सुरेन्द्रनगरे प्रान्तकार्यकर्तृ-अभ्यासवर्गस्य भव्यसुभारम्भः जातः। अस्य अभ्यासवर्गस्य मुख्यं प्रयोजनं संस्कृतभाषायाः प्रचार- प्रसारः एवञ्च सौराष्ट्रप्रान्तस्य कार्यकर्तृणां कौशल्यवृद्धिश्च आसीत्। अस्मिन् कार्यक्रमे सौराष्ट्रस्य षोडशजनपदेभ्यः नानानगरग्रामेभ्यश्च चत्वारिंशत् अधिकाः संस्कृतभाषायाः अनुरागिणः कार्यकर्तारः च उत्साहेन भागं गृहीतवन्तः। अस्य अभ्यासवर्गस्य प्रारम्भः दीपप्रज्वलनेन संस्कृतश्लोकोच्चारणेन च अभवत्, संस्कृतभारती- प्रान्तस्तरीय- कार्यकर्तृभिः नानासत्राणां सफलं सञ्चालनम् अभवत्। एतेषु सत्रेषु सर्वेषां कार्यकर्तृणां सङ्घटनं कथं सुदृढं भवति। कार्यकर्तृणां निर्माणं च कथं भवति इति सूक्ष्मं मार्गदर्शनं दत्तम्। उद्घाटनसत्रस्य सफलं सञ्चालनं डॉ. मुकेश ईढारीया अकरोत्, प्रासङ्गिकम् उद्बोधनं च प्रान्तमन्त्री डॉ. पङ्कजः त्रिवेदी अकरोत्। विधानसभासभ्यः जगदीशः मकवाणः अवदत् यत् “संस्कृतभाषा अतीव समृद्धा सर्वभाषाणां जननी च अस्ति। सर्वैः भारतीयैः स्वबालकेभ्यः संस्कृतं शिक्षयितव्यम्।” स्वामिनारायणगुरुकुलस्य सञ्चालकः स्वामी आनन्दप्रियदासः संस्कृतभाषायाः महत्त्वं स्पष्टयन् अवदत् यत् “यदि बालः संस्कृतं पठति तर्हि तस्य स्मृतिशक्तिः एकाग्रता च वर्धते।” कार्यकर्तृणां कृते विशेषतः इयं कार्यशाला आयोजिता। अस्यां कार्यशालायां संस्कृतभाषां जनेभ्यः प्रापयितुं नवीनाः युक्तयः, यान्त्रिकमाध्यमानाम् उपयोगः, समुदाये च जागृतिः कथं करणीया इति मार्गदर्शनं दत्तम्। अस्मिन् कार्यक्रमे मुख्यवक्तारः संस्कृतभारत्याः अखिलभारतीय- सहसङ्घटनमन्त्री दत्तात्रेयः वज्राल्ली, श्रीस्वामिनारायणमन्दिरस्य (राजकोटसंस्थानम्) सुरेन्द्रनगरस्य मुख्यसञ्चालकः स्वामीश्रीआनन्दप्रियदासः, संस्कृतभारती- सौराष्ट्रप्रान्तस्य मन्त्री डॉ. पङ्कज त्रिवेदी, सुरेन्द्रनगरस्य विधानसभासभ्यः विधानसभायाः उपमुख्यदण्डकः जगदीशभाई मकवाणा, पूर्वविधानसभासभ्यः धनराजभाई केला, विश्वहिन्दूपरिषदः पूर्णकालिकसमर्पितः भास्करभाई, संस्कृतभारती- सुरेन्द्रनगरस्य अध्यक्षः सञ्जयभाई उमराळिया, संस्कृतभारती- विभागसंयोजकः डॉ. पियूषभाई मेहता, प्रान्तसहसम्पर्कप्रमुखः डॉ. भरतभाई कणजरीया, प्रान्तपत्राचारप्रमुखः डॉ. मुकेश ईढारीया, प्रान्तशिक्षणप्रमुखः धर्मेन्द्रः मेमकिया, प्रान्तप्रचारप्रमुखः डॉ. किशोरः शेलडिया तथा च विविधजनपदानाम् अनेके कार्यकर्तारः नगरस्य श्रेष्ठिनः उपस्थिताः आसन्। सर्वे संस्कृतभाषां जनव्यवहारस्य भाषां कर्तुं चिन्तनं मननं च कृतवन्तः। संस्कृतभारत्याः अखिलभारतीय- सङ्घटनमन्त्री अवदत् यत् “अस्य अभ्यासवर्गस्य प्रयोजन अस्ति संस्कृतभाषायाः प्रसाराय कार्यकर्तृणां सशक्तीकरणं, येन ते स्वक्षेत्रेषु संस्कृतशिक्षणस्य प्रसारं कुर्युः।” संस्कृतभारत्याः एते प्रयासाः भारतीयसंस्कृतेः भाषायाः च संरक्षणाय महत्त्वपूर्णं सोपानं भविष्यति। भविष्ये अपि एतादृशाः कार्यक्रमाः भविष्यन्ति, येन संस्कृतभाषा जनानां जीवनस्य अभिन्नः भागः भवेत्। अभ्यासवर्गं सफलं कर्तुं संस्कृतभारती- सुरेन्द्रनगरस्य कार्यकर्तृभिः भृशं परिश्रमः कृतः इति संस्कृतभारती- प्रान्तप्रचारप्रमुखः डॉ. किशोर शेलडिया स्वस्य पत्रिकायां निरूपितवान्।